नं० ५१२३

नाम – मार्कण्डेय पुराणे देवी माहात्म्यम्

कर्त्ता – ×

पत्रसंख्या – २० पत्राणि सं० — ×

विषयः – पुराण माहात्म्यादि

देवीमाहात्म्यं सप्तशतिकावा
मार्कण्डेयपुराणे
(प्रथमचरतस्यसहितम्)

प १२३

ॐ स्वस्ति श्रीगणेशाय नमः ॐ नमश्चंडिकायै मार्कंडेय उवाच ॥ यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह १ ब्रह्मोवाच अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं

देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने २ प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी तृतीयं चंद्रघंटेति कूष्मांडेति चतुर्थकं ३ पंचमं स्कंदमातेति षष्ठं कात्यायिनीति च सप्तमं कालरात्रीच

महागौरीति चाष्टमं ४ नवमं सिद्धिदा चैव नवदुर्गाः प्रकीर्तिताः उक्तान्येतानि नामानि ब्रह्मणैव महात्मना ५ अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे विषमे दुर्गमे चैव भयार्ताः

शरणं गताः ६ न तेषां जायते किंचिदशुभं रणसंकटे नापदं तस्य पश्यामि शोकदुःखभयं नहि ७ यैस्तु भक्त्या स्मृता नूनं तेषां सिद्धिः प्रजायते प्रेतसंस्था तु चामुंडा वाराही महि

षासना ८ ऐंद्री गजसमारूढा वैष्णवी गरुडासना माहेश्वरी वृषारूढा कौमारी शिखिवाहना ९ ब्राह्मी हंससमारूढा सर्वाभरणभूषिता लक्ष्मीः पद्मासना देवी पद्महस्ता ह

रिप्रिया १० श्वेतरूपधरा देवी ईश्वरी वृषवाहना नानाभरणशोभाढ्या नानारत्नोपशोभिता दृश्यंते रथमारूढा देव्यः क्रोधसमाकुलाः शंखं चक्रं गदां शक्तिं हलं च मुसलायुधं खे

टकं तोमरं चैव परशुं पाशमेव च कुंतायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं दैत्यानां देहनाशाय भक्तानामभयाय च धारयंत्यायुधानीत्थं देवानां च हिताय वै १४ नमस्तेस्तु महा

रौद्रे महाघोरपराक्रमे महाबले महोत्साहे महाभयविनाशिनि १५ त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्द्धिनि प्राच्यां रक्षतु मामैंद्री आग्नेय्यामग्निदेवता १६ दक्षिणे रक्षतु वा

राही नैरृत्यां खड्गधारिणी प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी उदीच्यां रक्ष कौमारी ऐशान्यां शूलधारिणी ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्तात् वैष्णवी तथा १८ एवं दश दि

शो रक्षेच्चामुंडा शववाहना जया मे चाग्रतः पातु विजया पातु पृष्ठतः १९ अजिता वामपार्श्वे तु दक्षिणे चापराजिता शिखामुद्योतिनी रक्षेदुमा मूर्ध्नि व्यवस्थिता २० मालाधरी ललाटे च

भ्रुवौ रक्षेद्यशस्विनी त्रिनेत्रा च भ्रुवोर्मध्ये यमघंटा च नासिके २१ शंखिनी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी कपोलौ कालिका रक्षेत् कर्णमूले च शंकरी २२ नासिकायां सुगंधा च उ

त्तरौष्ठे च चर्चिका अधरे चामृतकला जिह्वायां च सरस्वती २३ दंतान् रक्षतु कौमारी कंठमध्ये तु चंडिका घंटिकां चित्रघंटा च महामाया च तालुके २४ कामाक्षी चिबुकं रक्षे

द्वाचं मे सर्वमंगला ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी २५ नीलग्रीवा बहिःकंठे नलिकां नलकूबरी स्कंधयोः खड्गिनी रक्षेद्बाहू मे वज्रधारिणी २६ हस्तयोर्दंडिनी रक्षे

दंबिका चांगुलीषु च नखाञ्छूलेश्वरी रक्षेत्कुक्षौ रक्षेन्नलेश्वरी २७ स्तनौ रक्षेन्महादेवी मनःशोकविनाशिनी हृदये ललिता देवी उदरे शूलधारिणी २८ ना

भौ च कामिनी रक्षेद्गुह्यं गुह्येश्वरी तथा पूतना कामिका मेढ्रं गुदे महिषवाहिनी २९ कट्यां भगवती रक्षेज्जानुनी विंध्यवासिनी जंघे महाबला प्रोक्ता सर्वकामप्रदायिनी ३०

गुल्फयोर्नारसिंही च पादपृष्ठे च तैजसी पादांगुलीः श्रीधरी रक्षेत्पादाधः स्थलवासिनी ३१ दंष्ट्राकरालिनी रक्षेत्केशांश्चैवोर्ध्वकेशिनी रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा ३२

रक्तमज्जावसामांसान्यस्थिमेदांसि पार्वती अंत्राणि कालरात्री च पित्तं च मुकुटेश्वरी ३३ पद्मावती पद्मकोशे कफे चूडामणिस्तथा ज्वालामुखी नखज्वालामभेद्या सर्वसंधिषु ३४

शुक्रं ब्रह्माणि मे रक्षेच्छायां छत्रेश्वरी तथा अहंकारं मनो बुद्धिं रक्षेन्मे धर्मधारिणी ३५ प्राणापानौ तथा व्यानमुदानं च समानकं वज्रहस्ता च मे रक्षेत्प्राणान् कल्याणशो

भना ३६ रसे गंधे च रूपे च शब्दे स्पर्शे च योगिनी सत्वं रजस्तमश्चैव रक्षेन्नारायणी तथा ३७ आयुर्मे रक्ष वाराही धर्मं रक्षतु वैष्णवी यशः कीर्तिं च लक्ष्मीं च सदा

रक्षंतु मातरः ३८ गोत्रमिंद्राणि मे रक्षेत्पशून्मे रक्ष चंडिके पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी ३९ धनेश्वरी धनं रक्षेत्कौमारी कन्यकां [illegible]

क्षेमंकरी रक्षेद्विजया सर्वतः स्थिता ४० सर्वरक्षाकरं पुण्यं कवचं सर्वदा जपेत् रहस्यं विप्रर्षे भक्त्या न वमयो दितं ४१ रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु त[illegible]

जयंती पापनाशिनी रक्षमे सर्वगात्राणि दुर्गे दुर्गतिहारिणि ४२ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः कवचेनावृतो नित्यं यत्र यत्रैव गच्छति ४३ तत्र[illegible]

अर्थलाभश्च विजयः सर्वकामिकः यं यं चिंतयते कामं तं तं प्राप्नोति लीलया ४४ परमैश्वर्यमतुलं प्राप्स्यति विपुलं पुमान् निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः ४[illegible]

न भवेत्स्पृश्यः कवचेनावृतः पुमान् रक्षंतु देव्यः कवचं देवानामपि दुर्लभं ४६ यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः दैवी कला भवेत्तस्य त्रैलोक्ये चापरा[illegible]

जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः नश्यंति व्याधयः सर्वे लूताविस्फोटकादयः ४८ स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषं अभिचाराणि सर्वाणि मंत्रयंत्राणि

भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः सहजा कुलजा माला डाकिनी शाकिनी तथा ५० अंतरिक्षचरा घोरा डाकिन्यश्च महाबलाः ग्रहभूतपिशाचाश्च

[illegible] गाः ५१ ब्रह्मराक्षसवेतालाः कूष्मांडा भैरवादयः नश्यंति [illegible]

...लवनकाननं ५५ यावद्भूमण्डलं धत्ते सशैलवनकाननं तावत्तिष्ठति मेदिन्यां संततिः पुत्रपौत्रकी ५६ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभं ५८ प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ... 
भविष्यति इति श्री हरिहरब्रह्मा विरचितं देव्याः कवचं समाप्तं ॐ अस्य श्री अर्गलास्तोत्रमन्त्रस्य विष्णुर्ऋषिः महाचण्डिका देवता अनुष्टुप् छन्दः ॐ ह्रीं बीजं क्लीं शक्तिः श्री दुर्गाप्रीत्यर्थे पाठे ज...
ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते १ मधुकैटभविद्रावि विधातृवरदे नमः रूपं देहि जयं देहि यशो
देहि २ महिषासुरनिर्नाशि विधातृवरदे नमः रूपं देहि जयं देहि ३ चण्डमुण्डवधे देवि रक्तबीजविनाशिनि रूपं देहि ४ निशुम्भशुम्भनिर्नाशि विधातृवरदे नमः
वन्दिताङ्घ्रियुगे देवि सर्वसौभाग्यदायिनि रूपं देहि ६ अचिन्त्यरूपचरिते सर्वशत्रुविनाशिनि रूपं देहि ७ नतेभ्यः सर्वदा भक्त्या चण्डिके दुरितापहे रू
स्तुवद्भ्यो भक्तिपूर्वं त्वां चण्डिके व्याधिनाशिनि रूपं ९ चण्डिके सततं ये त्वामर्चयन्तीह भक्तितः रूपं १० देहि सौभाग्यमारोग्यं देहि देवि परं सुखं रूपं ११ विधेहि द्विषतां नाशं विधेहि बलमु
विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं १२ सुरासुरशिरोरत्ननिघृष्टचरणेऽम्बिके रूपं १३ विद्यावन्तं यशस्वन्तं लक्ष्मीवन्तं जनं कुरु रूपं १४ देवि प्रचण्डदोर्दण्डदैत्यदर्पविनाशिनि
दैत्यदर्पघ्ने चण्डिके प्रणताय मे रूपं १७ चतुर्भुजे चतुर्वक्त्रसंस्तुते परमेश्वरि रूपं १८ कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके रूपं १९ हिमाचलसुतानाथसंस्तुते परमेश्वरि रूपं २० इन्द्राणी
पतिसद्भावपूजिते परमेश्वरि रूपं २१ देवि भक्तजनोद्दामदत्तानन्दोदयेऽम्बिके रूपं देहि जयं देहि यशो देहि द्विषो जहि पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं तारिणीं दुर्गसंसारसाग
रस्य कुलोद्भवां २३ इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः स तु सप्तशतीसंख्यावरमाप्नोति संपदः २४ इत्यर्गलास्तोत्रं संपूर्णम् ॐ नमश्चण्डिकायै ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यच
क्षुषे श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे १ सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकं सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः २ सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति ३ न मन्त्रो नौषधं तत्र न किंचिदपि विद्यते विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकं ४ समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः कृ
त्वा निमन्त्रयामास सर्वमेवमिदं शुभं ५ स्तोत्रं वै चण्डिकायास्तु तच्च गुह्यं चकार सः समाप्नोति स पुण्येन तां यथावन्निमन्त्रणां ६ सोऽपि क्षेममवाप्नोति सर्वमेव न संशयः कृष्णायां वा चतु
र्दश्यामष्टम्यां वा समाहितः ७ ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति इत्थंरूपेण कीलेन महादेवेन कीलितम् ८ यो निष्कीलां विधायैनां नित्यं जपति संस्फुटं
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः ९ न चैवाप्यटतस्तस्य भयं क्वापीह जायते नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात् १० ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति
ततो ज्ञात्वैव संपन्नमिदं प्रारभ्यते बुधैः ११ सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं ततः १२ शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे संपत्तिरुच्चकैः
भवत्येव समग्रापि ततः प्रारभ्यमेव तत् १३ ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसंपदः शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः इति श्री कीलकस्तोत्रम् ॐ प्रथमच
रित्रस्य ब्रह्मा ऋषिः महाकाली देवता गायत्री छन्दः नन्दा शक्तिः रक्तदन्तिका बीजं अग्निस्तत्त्वं महाकाली महासरस्वती महालक्ष्मीप्रीत्यर्थे जपे पाठे होमे विनियोगः ॐ मध्यमचरित्रस्य वि
ष्णुर्ऋषिः महालक्ष्मीर्देवता उष्णिक् छन्दः शाकम्भरी शक्तिः दुर्गा बीजं वायुस्तत्त्वं महालक्ष्मीप्रीत्यर्थे जपे विनियोगः ॐ उत्तमचरित्रस्य रुद्र ऋषिः महासरस्वती देवता
अनुष्टुप् छन्दः भीमा शक्तिः भ्रामरी बीजं सूर्यस्तत्त्वं महाकाली महालक्ष्मी महासरस्वती प्रीत्यर्थे जपे विनियोगः ॐ ॥ ॥ ॥ ॥ ॥ सावर्णिः सूर्यतनयो यो
ॐ सावर्णिः सूर्यतनयो यो मनुः कथ्यतेऽष्टमः निशामय तदुत्पत्तिं विस्तराद्गदतो मम १ महामायानुभावेन यथा मन्वन्तराधिपः स बभूव महाभागः सावर्णिस्तनयो
रवेः २ स्वारोचिषेऽन्तरे पूर्वं चैत्रवंशसमुद्भवः सुरथो नाम राजाभूत्समस्ते क्षितिमण्डले ३ तस्य पालयतः सम्यक् प्रजाः पुत्रानिवौरसान् बभूवुः शत्रवो भूपाः कोलाविध्वंसि
नस्तदा ४ तस्य तैरभवद्युद्धमतिप्रबलदण्डिनः न्यूनैरपि स तैर्युद्धे कोलाविध्वंसिभिर्जितः ५ ततः स्वपुरमायातो निजदेशाधिपोऽभवत् आक्रान्तः स महाभागस्तै
स्तदा प्रबलारिभिः ६ अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्य दुरात्मभिः कोशो बलं चापहृतं तत्रापि स्वपुरे ततः ७ ततो मृगयाव्याजेन हृतस्वाम्यः स भूपतिः एकाकी हयमारु
ह्य जगाम गहनं वनं ८ स तत्राश्रममद्राक्षीद्द्विजवर्यस्य मेधसः प्रशान्तश्वापदाकीर्णं मुनिशिष्योपशोभितं ९ तस्थौ कंचित्स कालं च मुनिना तेन सत्कृतः इत
श्चेतश्च विचरंस्तस्मिन्मुनिवराश्रमे १० सोऽचिन्तयत्तदा तत्र ममत्वाकृष्टमानसः मत्पूर्वैः पालितं पूर्वं मया हीनं पुरं हि तत् ११ मद्भृत्यैस्तैरसद्वृत्तैर्धर्म
तः पाल्यते न वा न जाने स प्रधानो मे शूरो हस्ती सदामदः १२ मम वैरिवशं यातः कान्भोगानुपलप्स्यते ये ममानुगता नित्यं प्रसादधनभोजनैः १३ अनुवृत्तिं ध्रुवं
तेऽद्य कुर्वन्त्यन्यमहीभृतां असम्यग्व्ययशीलैस्तैः कुर्वद्भिः सततं व्ययं १४ संचितः सोऽतिदुःखेन क्षयं कोशो गमिष्यति एतच्चान्यच्च सततं चिन्तयामास पार्थिवः १५
तत्र विप्राश्रमाभ्याशे वैश्यमेकं ददर्श सः स पृष्टस्तेन कस्त्वं भो हेतुश्चागमनेऽत्र कः १६ सशोक इव कस्मात्त्वं दुर्मना इव लक्ष्यसे इत्याकर्ण्य वचस्तस्य भूपतेः
...कीर्णो मनुर्नाम वसुसंख्यः स्तुतो मम २ तदस्य जिमहायोगी सर्वं वदविस्तरात् परोपकारहेतवे यं त्वयापि प्रणतस्य मे ३ श्री मार्कण्डेय उवाच ॥

त्यादितम् १७ मनुवाच स तं वैश्यः प्रश्रयावनतो नृपं १८ वैश्यउवाच समाधिर्नाम वैश्योहं उत्पन्नो धनिनां कुले पुत्रदारैर्निरस्तश्च धनलोभादसाधुभिः १९ विहीनः स्व
धनैर्दारैः पुत्रैरादाय मे धनं वनमभ्यागतो दुःखी निरस्तश्चाप्तबंधुभिः २० सोहं न वेद्मि पुत्राणां कुशलाकुशलात्मिकां प्रवृत्तिं स्वजनानां च दाराणां चात्र संस्थितः २१ किं
नु तेषां गृहे क्षेममक्षेमं किंनु सांप्रतं कथं ते किंनु सद्वृत्ता दुर्वृत्ताः किंनु मे सुताः २२ राजोवाच यैर्निरस्तो भवांल्लुब्धैः पुत्रदारादिभिर्धनैः तेषु किं भवतः स्नेहमनुबध्ना
ति मानसं २३ वैश्यउवाच एवमेतद्यथा प्राह भवानस्मद्गतं वचः किं करोमि न बध्नाति मम निष्ठुरतां मनः २४ यैः संत्यज्य पितृस्नेहं धनलुब्धैर्निराकृतः पतिः स्वजन
हार्दं च हार्दितेष्वेव मे मनः २५ किमेतन्नाभिजानामि जानन्नपि महामते यत्प्रेमप्रवणं चित्तं विगुणेष्वपि बंधुषु २६ तेषां कृते मे निःश्वासो दौर्मनस्यं च जायते करोमि
किं यन्न मनस्तेष्वप्रीतिषु निष्ठुरं २७ श्रीमार्कंडेयउवाच ततस्तौ सहितौ विप्र तं मुनिं समुपस्थितौ समाधिर्नाम वैश्योसौ स च पार्थिवसत्तमः २८ कृत्वा तु तौ यथा
न्यायं यथार्हं तेन संविदं उपविष्टौ कथाः काश्चिच्चक्रतुर्वैश्यपार्थिवौ २९ राजोवाच भगवंस्त्वामहं प्रष्टुमिच्छाम्येकं वदस्व तत् दुःखाय यन्मे मनसः स्वचित्ताय
त्ततां विना ३० ममत्वं गतराज्यस्य राज्यांगेष्वखिलेष्वपि जानतोपि यथाज्ञस्य किमेतन्मुनिसत्तम ३१ अयं च निःकृतः पुत्रैर्दारैर्भृत्यैस्तथोज्झितः स्वजनेन च
संत्यक्तस्तेषु हार्दी तथाप्यति ३२ एवमेष तथाहं च द्वावप्यत्यंतदुःखितौ दृष्टदोषेपि विषये ममत्वाकृष्टमानसौ ३३ तत्किमेतन्महाभाग यन्मोहो ज्ञानि
नोरपि ममास्य च भवत्येषा विवेकांधस्य मूढता ३४ ऋषिरुवाच ज्ञानमस्ति समस्तस्य जंतोर्विषयगोचरे विषयाश्च महाभाग यांति चैवं पृथक्
पृथक् ३५ दिवांधाः प्राणिनः केचि त्रावंधास्तथापरे केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः ३६ ज्ञानिनो मनुजाः सत्यं किंतु ते नहि केवलं यतो हि ज्ञानिनः
सर्वे पशुपक्षिमृगादयः ३७ ज्ञानं च तन्मनुष्याणां यत्तेषां मृगपक्षिणां मनुष्याणां च यत्तेषां तुल्यमन्यत्तथोभयोः ३८ ज्ञानेपि सति पश्यैतान् पतंगान् शावचंचुषु क
णमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा ३९ मानुषा मनुजव्याघ्र साभिलाषाः सुतान्प्रति लोभात्प्रत्युपकाराय नन्वेतान्किं न पश्यसि ४० तथापि ममता
वर्त्ते मोहगर्ते निपातिताः महामायाप्रभावेन संसारस्थितिकारिणः ४१ तन्नात्र विस्मयः कार्यो योगनिद्रा जगत्पतेः महामाया हरेश्चैषा तया संमोह्यते जग
गत् ज्ञानिनामपि चेतांसि देवी भगवती हि सा बलादाकृष्य मोहाय महामाया प्रयच्छति ४२ तया विसृज्यते विश्वं जगदेतच्चराचरं सैषा प्रसन्ना वरदा नृणां
भवति मुक्तये ४४ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी संसारबंधहेतुश्च सैव सर्वेश्वरेश्वरी ४५ राजोवाच भगवन्का हि सा देवी महामायेति यां भवान् ब्रवीति
कथमुत्पन्ना सा कर्मास्याश्च किं द्विज ४६ यत्प्रभावा च सा देवी यत्स्वरूपा यदुद्भवा तत्सर्वं श्रोतुमिच्छामि त्वत्तो ब्रह्मविदां वर ४७ ऋषिरुवाच नित्यैव सा जगन्मूर्ति
स्तया सर्वमिदं ततं तथापि तत्समुत्पत्तिर्बहुधा श्रूयतां मम ४८ देवानां कार्यसिद्ध्यर्थमाविर्भवति सा यदा उत्पन्नेति तदा लोके सा नित्याप्यभिधीयते ४९ योगनिद्रां य
दा विष्णुर्जगत्येकार्णवीकृते आस्तीर्य शेषमभजत्कल्पांते भगवान्प्रभुः ५० तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ विष्णुकर्णमलोद्भूतौ हंतुं ब्रह्माणमुद्यतौ ५१ स
नाभिकमले विष्णोः स्थितो ब्रह्मा प्रजापतिः दृष्ट्वा तावसुरौ चोग्रौ प्रसुप्तं च जनार्दनम् ५२ तुष्टाव योगनिद्रां तामेकाग्रहृदयस्थितः विबोधनार्थाय हरेर्हरिनेत्र कृताल
लयां ५३ विश्वेश्वरीं जगद्धात्रीं स्थितिसंहारकारिणीम् निद्रां भगवतीं विष्णोरतुलां तेजसः प्रभुः ५४ ब्रह्मोवाच त्वं स्वाहा त्वं स्वधा त्वं हि वषट्कारः स्वरात्मिका सु
धा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता ५५ अर्धमात्रा स्थिता नित्या यानुच्चार्या विशेषतः त्वमेव संध्या सावित्री त्वं देवी जननी परा ५६ त्वयैतद्धार्यते विश्वं त्वयैतत्सृ
ज्यते जगत् त्वयैतत्पाल्यते देवि त्वमत्स्यंते च सर्वदा ५७ विसृष्टौ सृष्टिरूपा त्वं स्थितिरूपा च पालने तथा संहृतिरूपांते जगतोस्य जगन्मये ५८ महाविद्या
महामाया महामेधा महास्मृतिः महामोहा च भगवती महादेवी महेश्वरी ५९ प्रकृतिस्त्वं च सर्वस्य गुणत्रयविभाविनी कालरात्रिर्महारात्रिर्मोहरात्रिश्च दा
रुणा ६० त्वं श्रीस्त्वमीश्वरी त्वं ह्रीस्त्वं बुद्धिर्बोधलक्षणा लज्जा पुष्टिस्तथा तुष्टिस्त्वं शांतिः क्षांतिरेव च ६१ खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा
शंखिनी चापिनी बाणभुशुंडीपरिघायुधा ६२ सौम्या सौम्यतराशेषा सौम्येभ्यस्त्वतिसुंदरी परापराणां परमा त्वमेव परमेश्वरी यच्च किंचित्क्वचिद्वस्तु स
दसद्वाखिलात्मिके तस्य सर्वस्य या शक्तिः सा त्वं किं स्तूयसे यदा यया त्वया जगत्स्रष्टा जगत्पात्यत्ति यो जगत् सोपि निद्रावशं नीतः कस्त्वां स्तोतुमि

दु.
२
देश्वरः ६५ विष्णुः शरीरग्रहणमहमीशान एव च कारितास्ते यतोतस्त्वां कः स्तोतुं शक्तिमान्भवेत् ६६ सा त्वमित्थं प्रभावैः स्वैरुदारैर्देवि संस्तुता मोहयैतौ दु-
राधर्षावसुरौ मधुकैटभौ ६७ प्रबोधं च जगत्स्वामी नीयतामच्युतो लघु बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ६८ ऋषिरुवाच एवं स्तुता तदा देवी तामसी तत्र वेधसा
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ ६९ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः निर्गम्य दर्शने तस्थौ ब्रह्मणोव्यक्तजन्मनः ७० उत्तस्थौ च जगन्नाथस्त-
या मुक्तो जनार्दनः एकार्णवे हि शयनात्ततः स ददृशे च तौ ७१ मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ क्रोधरक्तेक्षणावत्तुं ब्रह्माणं जनितोद्यमौ ७२ समुत्था-
य ततस्ताभ्यां युयुधे भगवान्हरिः पंचवर्षसहस्राणि बाहुप्रहरणो विभुः ७३ तावप्यतिबलोन्मत्तौ महामायाविमोहितौ उक्तवंतौ वरोस्मत्तो व्रियतामिति के-
शवं ७४ श्रीभगवानुवाच भवेतामद्य मे तुष्टौ मम वध्यावुभावपि किमन्येन वरेणात्र एतावद्धि वृतं मया ७५ ऋषिरुवाच वंचिताभ्यामिति तदा सर्वमापोमयं जगत्
विलोक्य ताभ्यां गदितो भगवान्कमलेक्षणः ७६ प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः आवां जहि न यत्रोर्वी सलिलेन परिप्लुता ७७ ऋषिरुवाच तथेत्यु-
क्त्वा भगवता शंखचक्रगदाभृता कृत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः ७८ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते ७९
इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये मधुकैटभवधो नाम प्रथमोध्यायः १ ऋषिरुवाच देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा महि-
षेसुराणामधिपे देवानां च पुरंदरे १ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं जित्वा च सकलान्देवानिन्द्रोभून्महिषासुरः २ ततः पराजिता देवाः पद्मयोनिं प्र-
जापतिं पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ ३ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम् त्रिदशाः कथयामासुर्देवाभिभवविस्तरं ४ सूर्येन्द्राग्न्यनिलेन्दूना-
यमस्य वरुणस्य च अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति ५ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि विचरंति यथा मर्त्या महिषेण दुरात्मना ६
एतद्वः कथितं सर्वममरारिविचेष्टितं शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यतां ७ इत्थं निशम्य देवानां वचांसि मधुसूदनः चकार कोपं शंभुश्च भ्रुकु-
टीकुटिलाननौ ८ ततोतिकोपपूर्णस्य चक्रिणो वदनात्ततः निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च ९ अन्येषां चैव देवानां शक्रादीनां शरीरतः
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत १० अतीव तेजसः कूटं ज्वलंतमिव पर्वतं ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं ११ अतुलं तत्र तत्तेजः सर्वदेवश-
रीरजं एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा १२ यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखं याम्येन चाभवन्केशा बाहवो विष्णुतेजसा १३ सौम्येन स्तनयो-
र्युग्मं मध्यं चैन्द्रेण चाभवत् वारुणेन च जंघोरू नितंबस्तेजसा भुवः १४ ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा वसूनां च करांगुल्यः कौबेरेण च नासि-
का १५ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा नयनत्रितयं जज्ञे तथा पावकतेजसा १६ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च अन्येषां
चैव देवानां संभवस्तेजसां शिवा १७ ततः समस्तदेवानां तेजोराशिसमुद्भवां तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः १८ ततो देवा ददुस्तस्यै
स्वानि स्वान्यायुधानि च शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक् १९ चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः शंखं च वरुणः
शक्तिं ददौ तस्यै हुताशनः मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः ददौ तस्यै सहस्राक्षो घंटामै-
रावताद्गजात् कालदंडाद्यमो दंडं पाशं चाम्बुपतिर्ददौ २२ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं समस्तरोमकूपेषु निजरश्मीन्दिवाकरः
२३ कालश्च दत्तवान्खड्गं तस्याश्चर्म च निर्मलं क्षीरोदश्चामलं हारमजरे च तथाम्बरे २४ चूडामणिं तथा दिव्यं कुंडले कटकानि च अर्धचंद्रं त-
था शुभ्रं केयूरान्सर्वबाहुषु २५ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं अंगुलीयकरत्नानि समस्तास्वंगुलीषु च २६ विश्वकर्मा ददौ
तस्यै परशुं चातिनिर्मलं अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनं २७ अम्लानपंकजां मालां शिरस्युरसि चापरां अददज्जलधि २

न्वा
त्स्यैवं कृतं चातिशोभनम् २८ हिमवान्वाहनं सिंहं रत्नानि विविधानि च ददावशून्यं सुरया पानपात्रं धनाधिपः २९ शेषश्च सर्वनागेशो महामणिविभूषितं
नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम् ३० अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा सम्मानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः ३१ तस्या नादेन घो
रेण कृत्स्नमापूरितं नभः अमायतातिमहता प्रतिशब्दो महानभूत् ३२ चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे चचाल वसुधा चेलुः सकलाश्च म
हीधराः ३३ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः ३४ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः सन्नद्धाखिलसै
न्यास्ते समुत्तस्थुरुदायुधाः ३५ आः किमेतदिति क्रोधादाभाष्य महिषासुरः अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः ३६ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा
पदाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बरां ३७ क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम् दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम् ३८ ततः प्रववृ
ते युद्धं तया देव्या सुरद्विषां शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरं ३९ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः ४०
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः अयुध्यतायुतानां च सहस्रेण महाहनुः ४१ पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः अयुतानां शतैः षड्भिर्बाष्क
लो युयुधे रणे ४२ गजवाजिसहस्रौघैरनेकैः परिवारितः वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत बिडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः युयुधे सं
युगे तत्र रथानां परिवारितः ४४ अन्ये च तत्रायुतशो रथनागहयैर्वृताः युयुधुः संयुगे देव्या सह तत्र महासुराः ४५ कोटिकोटिसहस्रैस्तु र
थानां दन्तिनां तथा हयानां च वृतो युद्धे तत्राभून्महिषासुरः ४६ तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा युयुधुः संयुगे देव्या खड्गैः परशु
पट्टिशैः ४७ केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः ४८ सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डि
का लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी ४९ अनायस्तानना देवी स्तूयमाना सुरर्षिभिः मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी ५० सो
ऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी चचारासुरसैन्येषु वनेष्विव हुताशनः ५१ निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका त एव सद्यः सं
भूता गणाः शतसहस्रशः ५२ युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः ५३ अवादयन्त पटहान्
गणाः शङ्खांस्तथापरे मृदङ्गांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे ५४ ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः खड्गादिभिश्च शतशो निजघा
न महासुरान् ५५ पातयामास चैवान्यान्घण्टास्वनविमोहितान् असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत् ५६ केचिद्द्विधाकृतास्तीक्ष्णैः
खड्गपातैस्तथापरे विपोथिता निपातेन गदया भुवि शेरते वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः केचिन्निपतिता भूमौ भिन्नाः शू
लेन वक्षसि ५८ निरन्तराः शरौघेण कृताः केचिद्रणाजिरे सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः ५९ केषाञ्चिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे
शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ६० विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः एकबाह्वक्षिचरणाः केचिद्देव्या द्विधाकृताः ६१ छिन्नेऽपि चान्ये शि
रसि पतिताः पुनरुत्थिताः कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः ६२ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः कबन्धाश्छिन्नशिरसः खड्गशक्त्यृ
ष्टिपाणयः ६३ तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः पतितै रथनागाश्वैरसुरैश्च वसुन्धरा अगम्या साभवत्तत्र यत्राभूत्स महारणः शोणि
८ तौघा महानद्यः सद्यस्तत्र विसुस्रुवुः मध्ये चासुरसैन्यस्य वारणासुरवाजिनां क्षणेन तन्महासैन्यमसुराणां तथाम्बिका निन्ये क्षयं यथा
वह्निस्तृणदारुमहाचयं ६६ स च सिंहो महानादमुत्सृजन्धुतकेसरः शरीरेभ्योऽमरारीणामसूनिव विचिन्वति देव्या गणै

श्चैतैस्तत्र हतं तु दुष्टं तया सुरैः यथैवं तु स्तुवुर्देवाः पुष्पवृष्टिमुचो दिवि ६८ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्री देवीमाहात्म्ये महिषासुरसैन्यव
दु धो नाम द्वितीयोध्यायः २ ऋषिरुवाच निहन्यमानं तत्सैन्यमवलोक्य महासुरः सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां १ स देवीं शरवर्षेण
३ ववर्ष समरे सुरः यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः तस्य छित्वा ततो देवी लीलयैव शरोत्करान् जघान तुरगान्बाणैर्यंतारं चैव वाजिनाम् ३
चिच्छेद च धनुः सद्यो ध्वजं चातिसमुच्छ्रितं विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ४ स छिन्नधन्वा विरथो हताश्वो हतसारथिः अभ्यधावत तां
देवीं खड्गचर्मधरोसुरः ५ सिंहमाहत्य खड्गेन तीक्ष्णधारेण मूर्ध्नि आजघान भुजे सव्ये देवीमप्यतिवेगवान् ६ तस्याः खड्गो भुजं प्राप्य पफाल नृप
नंदन ततो जग्राह शूलं स कोपादरुणलोचनः ७ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ८ दृष्ट्वा तदापत
च्छूलं देवी शूलममुंचत तच्छूलं शततां तेन नीतं स च महासुरः ९ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ आजगाम गजारूढश्चामरस्त्रिदशा
र्दनः ११ सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतं हुंकाराभिहतां भूमौ पातयामास निष्प्रभां १२ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः चि
क्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् १३ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा १४ युध्यमानौ ततस्तौ
तु तस्मान्नागान्महीं गतौ युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः १४ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा करप्रहारेण शिरश्चामरस्य पृथक्कृतं १५
उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः दंतमुष्टितलैश्चैव करालश्च निपातितः १६ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतम् वाष्कलं भिं
डिपालेन बाणैस्ताम्रं तथांधकम् १७ उग्रास्यमुग्रवीर्यं च तथैव च महाहनुम् त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी १८ बिडालस्यासिना का
दे यात्पातयामास वै शिरः दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयम् २० एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः माहिषेण स्वरूपेण त्रासयामास तान् २१
गणान् कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् लांगूलताडितांश्चान्यान् शृंगाभ्यां च विदारितान् २१ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च
निःश्वासपवनेनान्यान्पातयामास भूतले २३ निपात्य प्रमथानीकमभ्यधावत सोसुरः सिंहं हंतुं महादेव्याः कोपं चक्रे ततोंबिका २४ सोपि को
पान्महावीर्यः खुरक्षुण्णमहीतलः शृंगाभ्यां पर्वतानुच्चांश्चिक्षेप च ननाद च २५ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत लांगूलेनाहतश्चाब्धिः
प्लावयामास सर्वतः २६ धुतशृंगविभिन्नाश्च खंडखंडं ययुर्घनाः श्वासानिलास्ताः शतशो निपेतुर्नभसोचलाः २७ इति क्रोधसमा
ध्मातमापतंतं महासुरं दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् २८ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं तत्याज माहिषं रूपं सोपि ब
द्धो महामृधे २८ ततः सिंहोभवत्सद्यो यावत्तस्यांबिका शिरः छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत २९ तत एवाशु पुरुषं देवी चिच्छेद सा
यकैः तं खड्गचर्मणा सार्धं ततः सोभून्महागजः ३० करेण च महासिंहं तं चकर्ष जगर्ज च कर्षतस्तु करं देवी खड्गेन निरकृंतत ३१ ततो म
हासुरो भूयो माहिषं वपुरास्थितः तथैव क्षोभयामास त्रैलोक्यं सचराचरं ३२ ततः क्रुद्धा जगन्माता चंडिका पानमुत्तमम् पपौ पुनः
पुनश्चैव जहासारुणलोचना ननर्द चासुरः सोपि बलवीर्यमदोद्धतः विषाणाभ्यां च चिक्षेप चंडिकां प्रति भूधरान् ३४ सा च तान्प्रहि
तांस्तेन चूर्णयंती शरोत्करैः उवाच तं मदोद्धूतमुखरागाकुलाक्षरं ३५ देव्युवाच गर्ज गर्ज क्षणं मूढ मधु यावत्पिबाम्यहं म
यात्वयि हतेत्रैव गर्जिष्यंत्याशु देवताः ३६ ऋषिरुवाच एवमुक्त्वा समुत्पत्य सारूढा तं महासुरं पादेनाक्रम्य कंठे च शूलेनैन

मताडयत् ३७ ततः सोपि पदाक्रांतस्तया निजमुखात्ततः अर्द्धनिष्क्रांत एवाति देव्या वीर्येण संवृतः ३८ अर्द्धनिष्क्रांत एवासौ युध्यमानो महासुरः
तया महासिना देव्या शिरः छित्वा निपातितः ३९ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् प्रहर्षं च परं जग्मुः सकला देवतागणाः ४०
तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ४१ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये
महिषासुरवधो नाम तृतीयोध्यायः ३ ऋषिरुवाच शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या तां तुष्टुवुः प्र
णतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः १ देवा ऊचुः देव्या यया ततमिदं जगदात्मशक्त्या निःशेषदेवगणशक्तिसमूहमू
र्त्या तामंबिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः स्म विदधातु शुभानि सा नः २ यस्याः प्रभावमतुलं भगवाननंतो ब्रह्मा हरश्च न हि वक्तु
मलं बलं च सा चंडिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोति ३ या श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्म
नां कृतधियां हृदयेषु बुद्धिः श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वं ४ किं वर्णयाम तव रूपमचिंत्यरूपं किं
चातिवीर्यमसुरक्षयकारि भूरि किं चाहवेषु चरितानि तवाद्भुतानि सर्वेषु देव्यसुरदेवगणादिकेषु ५ हेतुः समस्तजगतां त्रिगुणापि दो
षैर्न ज्ञायसे हरिहरादिभिरप्यपारा सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ६ यस्याः समस्तसुरता स
मुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत एव जनैः स्वधा च ७ या मुक्तिहेतुर
विचिंत्यमहाव्रता च अभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैः विद्यासि सा भगवती परमा हि देवि ८
शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहंत्री ९
मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसंगा श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलि
कृतप्रतिष्ठा १० ईषत्सहासममलं परिपूर्णचंद्रबिंबानुकारि कनकोत्तमकांतिकांतं अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य
सहसा महिषासुरेण ११ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः प्राणान्मुमोच महिषस्तदतीव चि
त्रं कैर्जीव्यते हि कुपितांतकदर्शनेन १२ देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि विज्ञातमेतदधुनैव यद
स्तमेतन्नीतं बलं सुविपुलं महिषासुरस्य १३ ते संमता जनपदेषु धनानि तेषां तेषां यशांसि न च सीदति धर्मवर्गः धन्यास्त एव नि
भृतात्मजभृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना १४ धर्म्याणि देवि सकलानि सदैव कर्माण्यत्यादृतः प्रतिदिनं सुकृती करोति स्व
र्गं प्रयाति च ततो भवती प्रसादाल्लोकत्रयेपि फलदा ननु देवि तेन १५ दुर्गे स्मृता हरसि भीतिमशेषजंतोः स्वस्थैः स्मृता मतिमतीव शुभां द
दासि दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता १६ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नाम नरकाय चि
राय पापं संग्राममृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि १७ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु य

प्रहिणोषि शस्त्रं लोकान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थंमतिर्भवति तेष्वपि तेतिसाध्वी १८ खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकां
तिनिवहेन दृशोसुराणां यन्नागता विलयमंशुमदिंदुखंडयोग्यानना तव विलोकयतां तदेतत् १९ दुर्वृत्तवृत्तशमनं तव देवि शील
रूपं तथैतदविचिंत्यमतुल्यमन्यैः वीर्यं च हंतृहृतदेवपराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थम् २० केनोपमा भवतु तेस्य
पराक्रमस्य रूपं च शत्रुभयकार्यतिहारिकुत्र चित्ते कृपा समरनिष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवनत्रयेपि २१ त्रैलोक्यमेतद
खिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेपि हत्वा नीता दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते २२
शूलेन पाहि नो देवि पाहि खड्गेन चांबिके घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च २३ प्राच्यां रक्ष प्रतीच्यां च चंडिके रक्ष
दक्षिणे भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि २४ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते यानि चात्यंतघोराणि तै रक्षा
स्मांस्तथा भुवम् २५ खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः २६ ऋषिरुवाच ए
वं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः अर्चिता जगतां धात्री तथा गंधानुलेपनैः २७ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता प्राह
प्रसादसुमुखी समस्तान्प्रणतान्सुरान् २८ देव्युवाच व्रियतां त्रिदशाः सर्वे यदस्मत्तोभिवांछितं ददाम्यहमतिप्रीत्या स्तवैरेभिः सु
पूजिता २९ देवा ऊचुः भगवत्या कृतं सर्वं न किंचिदवशिष्यते यदयं निहतः शत्रुरस्माकं महिषासुरः यदि वापि वरो देयस्त्वयास्माकं म
हेश्वरि संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ३१ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमलानने तस्य वित्तर्द्धिविभवैर्धनदारादिसंप
दाम् ३३ वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ऋषिरुवाच इति प्रसादिता देवैर्जगतोर्थे तथात्मनः ३२ तथेत्युक्त्वा भद्रकाली बभू
वांतर्हिता नृप इत्येतत्कथितं भूप संभूता सा यथा पुरा ३४ देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी पुनश्च गौरीदेहात्सा समुद्भूता लो
यथाभवत् वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः रक्षणाय च लोकानां देवानामुपकारिणी तच्छृणुष्व मयाख्यातं यथावत्कथयामि
ते ३६ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोध्यायः ४ ऋषिरुवाच पुरा शुंभ
निशुंभाभ्यामसुराभ्यां शचीपतेः त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् १ तावेव सूर्यतां तद्वदधिकारं तथैंदवं कौबेरम
थ याम्यं च चक्राते वरुणस्य च २ तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः हृताधिकारा
स्त्रिदशास्ताभ्यां सर्वे निराकृताः महासुराभ्यां तां देवीं संस्मरंत्यपराजितां ४ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः
भवतां नाशयिष्यामि तत्क्षणात्परमापदः ५ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरम् जग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्
टुवुः ६ देवा ऊचुः ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ७ रौद्रायै नमो नि ४
त्यायै गौर्यै धात्र्यै नमो नमः ज्योत्स्नायै चेंदुरूपिण्यै सुखायै सततं नमः ८ कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कूर्म्यै नमो नमः नै ।

नत्यभ्भूतांलक्ष्म्यैपार्वाण्यैतेनमोनमः ९ दुर्गायैदुर्गपारायैसारायैसर्वकारिणै ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनमः १० अतिसौम्यातिरौद्रायै
नमस्तस्यैनमोनमः नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः ११ ॐ यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः
यादेवीसर्वभूतेषुचेतनेत्यभिधीयते नमस्तस्यै १३ यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता नमस्तस्यै १४ यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थि
ता नमस्तस्यै १५ यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता नमस्तस्यै १६ यादेवीसर्वभूतेषुछायारूपेणसंस्थिता नमस्तस्यै १७ यादेवीसर्वभू
तेषुशक्तिरूपेणसंस्थिता नमस्तस्यै १८ यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता नमस्तस्यै १९ यादेवीसर्वभूतेषुक्षान्तिरूपेणसंस्थिता नमस्त
स्यै २० यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता नमस्तस्यै २१ यादेवीसर्वभूतेषुलज्जारूपेणसंस्थिता नमस्तस्यै २२ यादेवीसर्वभूतेषुशान्तिरूपे
णसंस्थिता नमस्तस्यै २३ यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थिता नमस्तस्यै २४ यादेवीसर्वभूतेषुकान्तिरूपेणसंस्थिता नमस्तस्यै २५ यादे
वीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता नमस्तस्यै २६ यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता नमस्तस्यै २७ यादेवीसर्वभूतेषुधृतिरूपेणसंस्थिता
नमस्तस्यै यादेवीसर्वभूतेषुस्मृतिरूपेणसंस्थिता नमस्तस्यै २८ यादेवीसर्वभूतेषुदयारूपेणसंस्थिता नमस्तस्यै २९ यादेवीसर्वभूतेषुतुष्टिरूपे
णसंस्थिता नमस्तस्यै ३० यादेवीसर्वभूतेषुपुष्टिरूपेणसंस्थिता नमस्तस्यै यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता नमस्तस्यै ३१ यादेवीसर्वभू
तेषुभ्रान्तिरूपेणसंस्थिता नमस्तस्यै ३४ यादेवीसर्वभूतेषुस्वाहारूपेणसंस्थिता नमस्तस्यै ३५ यादेवीसर्वभूतेषुस्वधारूपेणसंस्थिता नमस्तस्यैनमस्तस्यै
नमस्तस्यैनमोनमः ३६ यादेवीसर्वभूतेषुमायारूपेणसंस्थिता नमस्तस्यै ३७ यादेवीसर्वभूतेषुकीर्त्तिरूपेणसंस्थिता नमस्तस्यै ३८ यादेवीसर्वभूतेषुसर्वरूपेणसंस्थिता
इन्द्रियाणामधिष्ठात्रीभूतानांचाखिलेषुया भूतेषुसततंतस्यैव्याप्त्यैदेव्यैनमोनमः ४० चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत् नमस्तस्यैनमस्तस्यैन नमस्तस्यै
मस्तस्यैनमोनमः ४१ स्तुतासुरैःपूर्वमभीष्टसंश्रयात्तथासुरेन्द्रेणदिनेषुसेविता करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहन्तुचापदः ४२ या ३५
सांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते याचस्मृतातत्क्षणमेवहन्तिनः सर्वापदोभक्तिविनम्रमूर्तिभिः ४३ ऋषिरुवाच एवंस्तवादियु
क्तानांदेवानांतत्रपार्वती स्नातुमभ्याययौतोयेजाह्नव्यानृपनन्दन ४४ साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिःस्तूयतेत्रका शरीरकोशतश्चास्याःसमुद्भू
ताब्रवीच्छिवा ४५ स्तोत्रंममैतत्क्रियतेशुम्भदैत्यनिराकृतैः देवैःसमस्तैःसमरेनिशुम्भेनपराजितैः ४६ शरीरकोशाद्यत्तस्याःपार्वत्यानिःसृतांबि
का कौशिकीतिसमस्तेषुततोलोकेषुगीयते ४७ तस्यांविनिर्गतायांतुकृष्णाभूत्सापिपार्वती कालिकेतिसमाख्याताहिमाचलकृताश्रया
४८ ततोम्बिकांपरंरूपंबिभ्राणांसुमनोहरां ददर्शचण्डोमुण्डश्चभृत्यौशुम्भनिशुम्भयोः ४९ ताभ्यांशुम्भायचाख्यातातीवसुमनोहरा काप्या
स्तेस्त्रीमहाराजभासयन्तीहिमाचलं ५० नैवतादृक्क्वचिद्रूपंदृष्टंकेनचिदुत्तमं ज्ञायतांकाप्यसौदेवीगृह्यतांचासुरेश्वर ५१ स्त्रीरत्नमतिचार्वङ्
गीद्योतयन्तीदिशस्त्विषा सातुतिष्ठतिदैत्येन्द्रतांभवान्द्रष्टुमर्हति ५२ यानिरत्नानिमणयोगजाश्वादीनिवैप्रभो त्रैलोक्येतुसमस्तानिसा
म्प्रतंभान्तितेगृहे ५३ ऐरावतःसमानीतोगजरत्नंपुरन्दरात् पारिजाततरुश्चायंतथैवोच्चैःश्रवाहयः ५४ विमानंहंससंयुक्तमेतत्तिष्ठ
तितेङ्गने रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतं ५५ निधिरेषमहापद्मःसमानीतोधनेश्वरात् किञ्जल्किनींददौचाब्धिर्माला
मम्लानपंकजाम् ५६ छत्रंतेवारुणंगेहेकाञ्चनस्रावितिष्ठति तथायंस्यन्दनवरोयःपुरासीत्प्रजापतेः ५७ मृत्योरुत्क्रान्तिदानाम

शक्तिरीशत्वयाहृता पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे ५८ निसुंभस्याब्धिजाताश्च समस्ता रत्नजातयः वह्निरपि ददौ तुभ्यमग्निशौची च वा
दु ससी ५९ एवं दैत्येंद्र रत्नानि समस्तान्याहृतानि ते स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ६० ऋषिरुवाच निशम्येति वचः शुंभः
५ स तदा चंडमुंडयोः प्रेषयामास सुग्रीवं दूतं देव्या महासुर ६१ इति चेति च वक्तव्या सा गत्वा वचनान्मम यथा चाभ्येति संप्रीत्या तथा कार्यं
त्वया लघुः ६२ स तत्र गत्वा यत्रास्ते शैलोद्देशेतिशोभने सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ६३ दूत उवाच देवि दैत्येश्वरः शुंभस्त्रैलो
क्ये परमेश्वरः दूतोहं प्रेषितस्तेन त्वत्सकाशमिहागतः ६४ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु निर्जिताखिलदैत्यारिः स यदा
ह शृणुष्व तत् ६५ मम त्रैलोक्यमखिलं मम देवा वशानुगाः यज्ञभागानहं सर्वानुपाश्नामि पृथक् पृथक् ६६ त्रैलोक्ये वररत्नानि मम व
श्यान्यशेषतः तथैव गजरत्नानि मम वश्यान्यशेषतः तथैव गजरत्नानि मम वश्यान्यशेषतः ऐरावत गजरत्नानि हृतं देवेंद्रवाहनम् ६७
क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः उच्चैःश्रवससंज्ञं तत् प्रणिपत्य समर्पितं यानि चान्यानि देवेषु गंधर्वेषूरगेषु च रत्नभूतानि भू
तानि तानि मय्येव शोभने स्त्रीरत्नभूतां त्वां देवि लोके मन्यामहे वयं सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं मां वा ममानुजं वा
पि निशुंभमुरुविक्रमं भज त्वं चंचलापांगि रत्नभूतासि वै यतः परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् एतद्बुद्ध्या समालोच्य मत्परिग्रहता
व्रज ऋषिरुवाच इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् देव्युवाच सत्यमुक्तं त्वया नात्र मिथ्या किं
चित्त्वयोदितं त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ७४ किं त्वत्र यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं श्रूयतामल्पबुद्धित्वान्प्र
तिज्ञा या कृता पुरा ७५ यो मां जयति संग्रामे यो मे दर्पं व्यपोहति यो मे प्रतिबलो लोके स मे भर्ता भविष्यति ७६ तदागच्छतु शुंभोत्र निशुंभो
वा महासुरः मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघुः ७७ दूत उवाच अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः त्रैलोक्ये कः पुमांस्तिष्ठेद
ग्रे शुंभनिशुंभयोः ७८ अन्येषामपि दैत्यानां सर्वे देवा न वै युधि तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका ७९ इंद्राद्याः सकला देवास्तस्थु
र्येषां न संयुगे शुंभादीनां कथं तेषां स्त्री प्रयास्यसि संमुखं ८० सा त्वं गच्छ मयैवोक्ता पार्श्वं शुंभनिशुंभयोः केशाकर्षणनिर्धूतगौरवा
मा गमिष्यसि ८१ देव्युवाच एवमेतद्बली शुंभो निशुंभश्चातिवीर्यवान् किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ८२ स त्वं गच्छ मयो
क्तं यदेतत्सर्वमादृतः तदाचक्ष्वासुरेंद्राय स च युक्तं करोतु यत् ८३ इति श्रीमार्कंडेयपुराणे दूतसंवादो नाम पंचमोध्यायः ५ ऋषि
रुवाच इत्याकर्ण्य वचो देव्याः स दूतोमर्षपूरितः समाचष्ट समागम्य दैत्यराजाय विस्तरात् १ तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् तत
ः सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं २ हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः तामानय बलाद्दुष्टां केशाकर्षणविह्वलां
न् तत्परित्राणदः कश्चिद्यदि चोत्तिष्ठतेपरः स हंतव्योमरो वापि यक्षो गंधर्व एव च ४ ऋषिरुवाच तेनाज्ञप्तस्ततः शीघ्रं स दै
त्यो धूम्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ५ स दृष्ट्वा तां ततो देवीं तुहिनाचलसंस्थितां जगादोच्चैः प्रया ५
हि मूलं शुंभनिशुंभयोः ६ न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यसि ततो बलान्नयाम्येष केशाकर्षणविह्वलां ७ देव्युवाच

दैत्येश्वरेणप्रहितोवलवान्वलसंवृतः वलान्नयसिमामेवंततःकिंतेकरोम्यहं ८ ऋषिरुवाच इत्युक्तःसोभ्यधावत्तामसुरोधूम्रलोचनः हुं
कारेणैवतंभस्मसाचकाराम्बिकाततः ९ अथक्रुद्धंमहासैन्यमसुराणांतथांबिका ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिपरश्वधैः १० ततो
धुतसटःकोपात्कृत्वानादंसुभैरवं पपातासुरसेनायांसिंहोदेव्याश्ववाहनः ११ कांश्चित्करप्रहारेणदैत्यानास्येनचापरान् आक्रां
त्याचाधरेणान्यान्सजघानमहासुरान् १२ केषांचित्पाटयामासनखैःकोष्ठानिकेसरी तथातलप्रहारेणशिरांसिकृतवान्पृथक् १३ वि
छिन्नवाहुशिरसःकृतास्तेनतथापरे पपौचरुधिरंकोष्ठादन्येषांधुतकेसरः १४ क्षणेनतद्वलंसर्वंक्षयंनीतंमहात्मना तेनकेसरिणादेव्यावा
हनेनातिकोपिना १५ श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनम् वलंचक्षयितंकृत्स्नंदेवीकेसरिणाततः १६ चुकोपदैत्याधिपतिःसुंभःप्रस्फुरि
ताधरः आज्ञापयामासचतौचंडमुंडौमहासुरौ १७ हेचंडहेमुंडवलैर्वहुभिःपरिवारितौ तत्रगच्छतगत्वाचसासमानीयतांलघु १८ केशेष्वाकृष्यवध्वावाप
दिवःसंशयोयुधि तदाशेषायुधैःसर्वैरसुरैर्विनिहन्यतां १९ तस्यांहतायांदुष्टायांसिंहेचविनिपातिते शीघ्रमागम्यतांवध्वागृहीत्वातामथांबिकां २०
इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुंभनिसुंभसेनानीधूम्रलोचनवधोषष्ठोध्यायः ६ ऋषिरुवाच आज्ञप्तास्तेततोदैत्याश्चंड
मुंडपुरोगमाः चतुरंगवलोपेताययुरभ्युद्यतायुधाः १ ददृशुस्तेततोदेवीमीषद्धासांव्यवस्थितां सिंहस्योपरिशैलेंद्रश्रृंगेमहतिकांचने २
तेदृष्ट्वातांसमादातुमुद्यमंचक्रुरुद्यताः आकृष्टचापासिधरास्तथान्येतत्समीपगाः ३ ततःकोपंचकारोच्चैरंविकातानरीन्प्रति कोपेनचा
स्यावदनंमषीवर्णमभूत्तदा ४ भ्रुकुटीकुटिलात्तस्याःललाटफलकाद्द्रुतं कालीकरालवदनाविनिष्क्रांतासिपाशिनी ५ विचित्र
खट्वांगधरानरमालाविभूषणा द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा ६ अतिविस्तारवदनाजिह्वाललनभीषणा निमग्नारक्तन
यनानादापूरितदिङ्मुखा ७ सावेगेनाभिपतिताघातयंतीमहासुरान् सैन्येतत्रसुरारीणामभक्षयततद्वलम् ८ पार्ष्णिग्राहां
कुशग्राहियोधघंटासमन्वितान् समादायैकहस्तेनमुखेचिक्षेपवारणान् ९ तथैवयोधंतुरगैरथंसारथिनासह निक्षिप्यवक्त्रेद
शनैश्चर्वयंत्यतिभैरवं १० एकंजग्राहकेशेषुग्रीवायामथचापरान् पादेनाक्रम्यचैवान्यानुरसान्यमपोथयत् ११ तैर्मुक्तानिच
शस्त्राणिमहास्त्राणितथासुरैः मुखेनजग्राहरुषादशनैर्मथितान्यपि १२ वलिनांतद्वलंसर्वमसुराणांमहात्मनां ममर्दाभ
क्षयच्चान्यानन्यांश्चाताडयत्तदा १३ असिनानिहताःकेचित्केचित्खट्वांगताडिताः जग्मुर्विनाशमसुरादंताग्राभिहतास्तदा १४
क्षणेनतद्वलंसर्वमसुराणांनिपातितं दृष्ट्वाचंडोभिदुद्रावतांकालीमतिभीषणां १५ शरवर्षैर्महाभीमैर्भीमाक्षींतांमहासुरः
छादयामासचक्रैश्चमुंडःक्षिप्तैःसहस्रशः १६ तानिचक्राण्यनेकानिविशमानानितन्मुखं वभुर्यथार्कविंबानिसुबहूनिघ
नोदरं ततोजहासातिरुषाभीमंभैरवनादिनी कालीकरालवक्त्रांतर्दुर्दर्शदशनोज्वला १८ उत्थायचमहासिंहंदेवीचंडम
धावत गृहीत्वाचास्यकेशेषुशिरस्तेनासिनाछिनत् १९ अथमुंडोभ्यधावत्तांदृष्ट्वाचंडंनिपातितं तमप्यपातयद्भूमौसाख ५
छिन्नेधनुषिदैत्येंद्रःसनिनादसुभैरवं तेननादेनमहतात्रासितंभुवनत्रयं २०

ड्गाभिहतं रुषा २१ हत [illegible] षं ततः सैन्यं दृष्ट्वा चंडं निपातितं मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं २२ शिरश्चंडस्य
द. कालीच गृहीत्वा मुंडमेव च प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां २३ मया तवात्रोपहृतौ चंडमुंडौ महापशू युद्धयज्ञे स्वयं शुं
६ भंनिशुंभं च हनिष्यसि २४ ऋषिरुवाच तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ उवाच कालीं कल्याणी ललितं चंडिका वचः २५
यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता चामुंडेति ततो लोके ख्याता देवि भविष्यसि २६ इति श्री मार्कंडेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये चंडमुंडवधो नाम सप्तमोध्यायः ७ ऋषिरुवाच चंडे च निहते दैत्ये मुंडे च विनिपातिते बहुलेषु च सैन्येषु क्ष
यितेष्वसुरेश्वरः १ ततः कोपपराधीनचेताः शुंभः प्रतापवान् उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह २ अद्य सर्वबलैर्दैत्याः
षडशीतिरुदायुधाः कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ३ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै शतं कुलानि धौ
म्राणां निर्गच्छंतु ममाज्ञया ४ कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ५ इ
त्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः निर्जगाम महासैन्यः सहस्रैर्बहुभिर्वृतः ६ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं ज्या
स्वनैः पूरयामास धरणीगगनांतरं ७ ततः सिंहो महानादमतीव कृतवान्नृप घंटास्वनेन तन्नादमंबिका चोपबृंहयत् ८ ध
नुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा निनादैर्भीषणैः काली जिग्ये विस्तारितानना ९ तन्निनादमुपश्रुत्य दैत्यसैन्यैः
चतुर्दिशं देवी सिंहस्तथा काली सरोषैः परिवारिता १० एतस्मिन्नंतरे भूप विनाशाय सुरद्विषां भवायामरसिंहानामतिवीर्य
बलान्विताः ११ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः १३ यस्य देवस्य यद्रूपं यथा भूष
णवाहनं तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ १४ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः आयाता ब्रह्मणः शक्तिर्ब्रह्मा
णीसाभिधीयते १५ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी महाहिवलया प्राप्ता चंद्ररेखाविभूषणा १६ कौमारी शक्तिह
स्ता च मयूरवरवाहना योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी १७ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता शंख
चक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ यज्ञवाराहमतुलं रूपं या बिभ्रती हरेः शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं
२० नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः २१ वज्रहस्ता तथैवैंद्री गजराजोपरिस्थि
ता प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा २२ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः हन्यंतामसुराः शीघ्रं मम प्रीत्या
ह चंडिकां २३ ततो देवीशरीरात्तु विनिष्क्रांतातिभीषणा चंडिकाशक्तिरत्युग्रा शिवाशतनिनादिनी २४ सा चाह धूम्र ६
जटिलमीशानमपराजिता दूत त्वं गच्छ भगवन्पार्श्वं शुंभनिशुंभयोः २५ ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ये
न्येनिमूः ९.

यान्ये दानवास्तत्र युद्धाय समुपस्थिताः २६ त्रैलोक्यमिंद्रो लभतां देवाः संतु हविर्भुजः यूयं प्रयात पातालं यदि जीवितुमिच्छथ २७ बलावलेपाद[illegible]
युद्धकांक्षिणः तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः २८ यतो नियुक्तो दौत्येन तया देव्या शिवः स्वयं शिवदूतीति लोकेऽस्मिंस्ततः सा ख्यातिमागता
तेऽपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः अमर्षापूरिता जग्मुर्यत्र कात्यायनी स्थिता ३० ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धता-
मर्षास्तां देवीममरारयः ३१ सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ३२ तस्याग्रतस्तथा काली शू-
लपातविदारितान् खट्वांगपोथितांश्चारीन्कुर्वंती विचरत्तदा ३३ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धा-
वति ३४ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ३५ ऐंद्रीकुलिशपातेन शतशो दैत्यदानवाः पे-
तुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः ३६ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः वाराहमूर्त्या न्यपतंश्चक्रेण च विदारिताः ३७ नखैर्विदारितांश्चान्यान्भ-
क्षयंती महासुरान् नारसिंही चचाराजौ नादापूर्णदिगंतरा ३८ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा
तदा ३९ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः ४० पलायनपरान्दृष्ट्वा दैत्यान्मातृगणा-
र्दितान् योद्धुमभ्याययौ दैत्यो रक्तवीजो महासुरः ४० रक्तविंदुर्यदा भूमौ पतत्यस्य शरीरतः समुत्पतति मेदिन्यां तत्प्रमाणस्तदासुरः ४१ युयुधे स गदापाणिरिंद्रश-
क्त्या महासुरः ततश्चैंद्री स्ववज्रेण रक्तवीजमताडयत् ४२ कुलिशेनाहतस्याशु बहु सुस्राव शोणितं समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ४३ या-
वंतः पतितास्तस्य शरीराद्रक्तविंदवः तावंतः पुरुषा जातास्तद्वीर्यवलविक्रमाः ४४ ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः समं मातृभिरत्युग्रश-
स्त्रपातातिभीषणं ४५ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ४६ वैष्णवी समरे चैनं चक्रेणाभिजघान ह गदया ताडया-
मास ऐंद्री तमसुरेश्वरं ४७ वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ४८ शक्त्या जघान कौमारी वाराही च तथासि-
ना माहेश्वरी त्रिशूलेन रक्तवीजं महासुरं ४९ स चापि गदया दैत्यः सर्व एवाहनत्पृथक् मातॄः कोपसमाविष्टो रक्तवीजो महासुरः ५० तस्या-
हतस्य बहुधा शक्तिशूलादिभिर्भुवि पपात यो वै रक्तौघस्तेनासञ्छतशोऽसुराः ५१ तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् व्याप्तमासीत्ततो देवा
भयमाजग्मुरुत्तमं ५२ तान्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा उवाच कालीं चामुंडे विस्तरं वदनं कुरु ५३ मच्छस्त्रपातसंभूतान् रक्तवि-
दून्महासुरान् रक्तविंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना ५४ भक्षयंती चर रणे तदुत्पन्नान्महासुरान् एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति
५५ भक्ष्यमाणास्त्वया चोग्रा न चोत्पत्स्यंति चापरे इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं ५६ मुखेन काली जगृहे रक्तवीजस्य शोणितं ततोऽसा-
वाजघानाथ गदया तत्र चंडिकां ५७ न चास्या वेदनां चक्रे गदापातोऽल्पिकामपि तस्याहतस्य देहात्तु बहु सुस्राव शोणितं ५९ यतस्ततस्तद्वक्त्रेण चा-
मुंडा संप्रतीच्छति मुखे समुद्गता येऽस्या रक्तपातान्महासुराः ६० तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं देवी शूलेन वज्रेण बाणैरसिभिरृष्टिभिः
जघान रक्तवीजं तं चामुंडापीतशोणितं स पपात महीपृष्ठे शस्त्रसंघसमाहतः ६२ नीरक्तश्च महीपाल रक्तवीजो महासुरः ततस्ते हर्षम-
तुलमवापुस्त्रिदशा नृप ६३ तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ६४ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये रक्त-
वीजवधः ८

…[illegible]ध्याय: ८ … ।। १ भूयश्चेच्छाम्यहं श्रोतुं रक्तवीजे नि-

पातिते चकार सुंभो यत्कर्म्म[illegible]कोपन: २ ऋषिरुवाच चकार कोपमतुलं रक्तवीजे निपा[illegible]भश्च हतेष्वन्येषु चाहवे ३ हन्यमा-

[illegible]महासैन्यं विलोक्यामर्षमुद्वहन् अभ्यधावन्निसुंभोथ मुख्ययासुरसेनया ४ तस्याग्रतस्तथा पृष्ठे पार्श्वयोश्च महासुरा: संदष्टोष्ठपुटा: क्रुद्धा: हन्तुं दे-

वीमुपाययु: ५ आजगाम महावीर्य: सुंभोपि स्वबलैर्वृत: निहन्तुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभि: ६ ततो युद्धमतीवासीद्देव्या: सुंभनिसुंभयो: शरवर्षम-

तीवोग्रं मेघयोरिव वर्षतो: ७ चिच्छेदतान्शरांस्ताभ्यां चंडिका स्वशरोत्करै: ताडयामास चांगेषु शस्त्रौघैरसुरेश्वरौ ८ निसुंभो निशितं खड्गं चर्मचा-

दाय सुप्रभं अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमं ९ ताडिते वाहने देवी क्षुरप्रेणासिमुत्तमं निसुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकं १० छिन्नेच

र्मणि खड्गेच शक्तिं चिक्षेप सोसुर: तामप्यस्य द्विधा चक्रे चक्रेणाभिमुखागतां ११ कोपाध्मातो निसुंभोथ शूलं जग्राह दानव: आयांतं मुष्टिपा-

तेन देवी तच्चाप्यचूर्णयत् १२ आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता १३ तत: परशुहस्तं त-

मायांतं दैत्यपुंगवं आहत्य देवी बाणौघैरपातयत भूतले १४ तस्मिन्निपतिते भूमौ निसुंभे भीमविक्रमे भ्रातर्यतीव संक्रुद्ध: प्रययौ ह-

न्तुमंबिकां १५ स रथस्थस्तदात्युच्चैर्गृहीतपरमायुधै: भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभ: १६ तमायांतं समालोक्य देवी शंखमवादयत्

ज्याशब्दं चापि धनुषश्चकारातीव दु:सहं १७ पूरयामास ककुभो निजघंटास्वनेनच समस्तदैत्यसैन्यानां तेजोवधविधायिना १८ तत: सिं-

हो महानादैस्त्याजितेभमहामदै: पूरयामास गगनं गां तथोपदिशो दश १९ तत: काली समुत्पत्य गगनं क्ष्मामताडयत् कराभ्यां त-

न्निनादेन प्राक्स्वनास्ते तिरोहिता: २० अट्टाट्टहासमशिवं शिवदूती चकार ह तै: शब्दैरसुरास्त्रेसु: सुंभ: कोपं परं ययौ २१ दुरात्मंस्तिष्ठ तिष्ठेति

व्याजहारांबिका यदा तदा जयेत्यभिहितं देवैराकाशसंस्थितै: २२ सुंभेनागत्य या शक्तिर्मुक्ता ज्वालातिभीषणा आयांती

वह्निकूटाभा सा निरस्ता महोल्कया २३ सिंहनादेन सुंभस्य व्याप्तं लोकत्रयांतरं निर्घातनि:स्वनो घोरो जितवानवनीपते २४ सुंभमु-

क्तान्शरान्देवी सुंभस्तत्प्रहितान्शरान् चिच्छेद स्वशरैरुग्रै: शतशोथ सहस्रश: २५ तत: सा चंडिका क्रुद्धा शूलेनाभिजघान तं स तदाभिहतो भू-

मौ मूर्च्छितो निपपात ह २६ ततो निसुंभ: संप्राप्य चेतनामात्तकार्मुक: आजघान शरैर्देवीं कालीं केसरिणं तथा २७ पुनश्च कृत्वा बाहूनामयुतं

दनुजेश्वर: चक्रायुधेन दितिजश्छादयामास चंडिकां २८ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी चिच्छेद तानि चक्राणि स्वशरै: सायकांश्च तान् २९

ततो निसुंभो वेगेन गदामादाय चंडिकां अभ्यधावत वै हन्तुं दैत्यसेनासमावृत: ३० तस्यापतत एवाशु गदां चिच्छेद चंडिका खड्गेन शितधारेण सच शूलं समाददे ३१ शूलह-

स्तं समायांतं निसुंभममरार्दनं हृदि विव्याध शूलेन वेगाविद्धेन चंडिका ३२ भिन्नस्य तस्य शूलेन हृदयान्नि:सृतोपर: महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ३३

तस्य नि:क्रामतो देवी प्रहस्य स्वनवत्तत: शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि ३४ तत: सिंहश्चखादोग्रदंष्ट्राक्षुण्णशिरोधरान् असुरांस्तांस्तथा

काली शिवदूती तथापरान् ३५ कौमारीशक्तिनिर्भिन्ना: केचिन्नेशुर्महासुरा: ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृता: ३६ माहेश्वरीत्रि-

शूलेन भिन्ना: पेतुस्तथापरे वाराहीतुंड[illegible]केचिच्चूर्णीकृता भुवि: ३७ खंडंखंडंच चक्रेण वैष्णव्या दानवा: कृता: [illegible]

[illegible]

ग्रविमुक्तेनतथापरे ३८ केचिद्विनेशुरसुराः केचिन्नष्टामहाहवात् भक्षिताश्चापरेकालीशिवदूतीमृगाधिपैः ३९ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंत
रेदेवीमाहात्म्येनिसुंभवधोनामनवमोध्यायः ९ ऋषिरुवाच निसुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसंमितं हन्यमानंबलंचैवसुंभःक्रुद्धोब्रवीद्वचः बलावलेपाद्दु
ष्टेत्वंमादुर्गेगर्वमावह अन्यासांबलमाश्रित्ययुद्धसेयातिमानिनी २ श्रीदेव्युवाच एकैवाहंजगत्यत्रद्वितीयाकाममापरा पश्यैतादुष्टमय्येवविशंत्योमद्विभू
तयः ३ ऋषिरुवाच ततःसमस्तास्तादेव्योब्रह्माणीप्रमुखालयं तस्यादेव्यास्तनौजग्मुरेकैवासीत्तदांबिका ४ श्रीदेव्युवाच अहंविभूत्याबहुभिरिहरू
पैर्यदास्थिता तत्संहृतंमयैकैवतिष्ठाम्याजौस्थिरोभव ५ ऋषिरुवाच ततःप्रववृतेयुद्धंदेव्याःसुंभस्यचोभयोः पश्यतांसर्वदेवानांअसुराणांचदारु
ण ६ शरवर्षैःशितैःशस्त्रैस्तथास्त्रैश्चैवदारुणैः तयोर्युद्धमभूद्भूयःसर्वलोकभयंकरं ७ दिव्यान्यस्त्राणिशतशोमुमुचेयान्यथांबिका बभंज
तानिदैत्येंद्रस्तत्प्रतीघातकर्तृभिः ८ मुक्तानितेनचास्त्राणिदिव्यानिपरमेश्वरी बभंजलीलयैवोग्रहुंकारोच्चारणादिभिः ९ ततःशरशतैर्देवीमाच्छा
दयत्ससोसुरः सापितत्कुपितादेवीधनुश्चिच्छेदचेषुभिः १० छिन्नेधनुषिदैत्येंद्रस्तथाशक्तिमथाददे चिच्छेददेवीचक्रेणतामप्यस्यकरेस्थितां ११
ततःखड्गमुपादायशतचंद्रंचभानुमत् अभ्यधावततोदेवींदैत्यानामधिपेश्वरः १२ तस्यापततएवाशुखड्गंचिच्छेदचंडिका धनुर्मुक्तैःशितैर्बाणैश्चर्मचार्ककर
ामलं अश्वांश्चपातयामासरथंसारथिनासह हताश्वःसतदादैत्यःछिन्नधन्वाविसारथिः जग्राहमुद्गरंघोरमंबिकानिधनोद्यतः १४ चिच्छेदापत
तस्तस्यमुद्गरंनिशितैःशरैः तथापिसोभ्यधावत्तांमुष्टिमुद्यम्यवेगवान् समुष्टिंपातयामासहृदयेदैत्यपुंगवः देव्यास्तंचापिसादेवीतल
नोरस्यताडयत् १६ तलप्रहाराभिहतोनिपपातमहीतले सदैत्यराजःसहसापुनरेवतथोत्थितः १७ उत्पत्यचप्रगृह्योच्चैर्देवींगगनमा
स्थितः तत्रापिसानिराधारायुयुधेतेनचंडिका १८ नियुद्धंखेतदादैत्यश्चंडिकाचपरस्परं चक्रतुःप्रथमंसिद्धमुनिविस्मयकारकं १९ ततोनियुद्धंसुचि
रंकृत्वातेनांबिकासह उत्पात्यभ्रामयामासचिक्षेपधरणीतले २० सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवेगवान् अभ्यधावतदुष्टात्माचंडिकानि धौ
धनेच्छया तमायांतंततोदेवीसर्वदैत्यजनेश्वरं जगत्यांपातयामासभित्त्वाशूलेनवक्षसि २२ सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः चाल
यन्सकलांपृथ्वींसाब्धिद्वीपांसपर्वतां ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि २३ जगत्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः उत्पातमेघाःसो
ल्कायेप्रागासंस्तेशमंययुः सरितोमार्गवाहिन्यस्तथासंसुंभेनिपातिते २५ ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः बभूवुर्निहतेतस्मिंगंधर्वा
ललितंजगुः २६ अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः ववुःपुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः २७ जज्वलुश्चाग्नयःशांताःशांता
दिग्जनितस्वनाः २८ इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेश्रीदेवीमहात्म्येसुंभवधोनामदशमोध्यायः १० ऋषिरुवाच दे.

दु
८
व्याहतेतत्र महासुरेंद्रे सेंद्राः सुरा वह्निपुरोगमास्तां कात्यायनीं तुष्टुवुरिष्टलाभाद्विकासिवक्त्रास्तु विकासिताशाः १ देविप्रपन्नार्त्तिहरे प्रसीद प्रसीद मातर्जग
तोखिलस्य प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य २ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः स्थितासि अपां स्वरूपस्थित
या त्वयैतदाप्यायते कृत्स्नमलंघ्यवीर्ये ३ त्वं वैष्णवी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया सम्मोहितं देवि समस्तमेतत्त्वं वै प्रसन्ना
भुवि मुक्तिहेतुः ४ विद्याः समस्तास्तव देवि भेदाः स्त्रियाः समस्ताः सकला जगत्सु त्वयैकया पूरितमंबयैतत्का ते स्तुतिः स्तव्यपरा परोक्तिः ५ सर्व
भूता यदा देवी स्वर्गमुक्तिप्रदायिनी त्वं स्तुता स्तुतये का वा भवंतु परमोक्तयः ६ सर्वस्य बुद्धिरूपेण जनस्य हृदि संस्थिते स्वर्गापवर्गदे देवि नारायणि न
मोस्तुते ७ कलाकाष्ठादिरूपेण परिणामप्रदायिनी विश्वस्योपरतौ शक्ते नारायणि नमोस्तुते ८ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधके
शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ९ सृष्टिस्थितिविनाशानां शक्तिभूते सनातनि गुणाश्रये गुणमये नारायणि नमोस्तुते १० शरणा
गतदीनार्त्तपरित्राणपरायणे सर्वस्यार्त्तिहरे देवि नारायणि नमोस्तुते ११ हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि कौशांभः क्षरिके दे
वि नारायणि नमोस्तुते १२ त्रिशूलचंद्राहिधरे महावृषभवाहिनि माहेश्वरीस्वरूपेण नारायणि नमोस्तुते १३ मयूरकुक्कुटवृते महाशक्तिध क्रो
रेनघे कौमारीरूपसंस्थाने नारायणि नमोस्तुते १४ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे प्रसीद वैष्णवीरूपे नारायणि नमोस्तुते १५ गृ
हीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे वराहरूपिणि शिवे नारायणि नमोस्तुते १६ नृसिंहरूपेणोग्रेण हंतुं दैत्यान् कृतोद्यमे त्रैलोक्यत्राणसहि
ते नारायणि नमोस्तुते किरीटिनि महावज्रे सहस्रनयनोज्वले वृत्रप्राणहरे चैंद्रि नारायणि नमोस्तुते १८ दंष्ट्राकरालवदने शिरोमाला
विभूषणे चामुंडे मुंडमथने नारायणि नमोस्तुते १९ शिवदूतीस्वरूपेण हतदैत्यमहाबले घोररूपे महारावे नारायणि नमोस्तुते २० लक्ष्मि
लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे महारात्रि महाविद्ये नारायणि नमोस्तुते २१ मेधे सरस्वति वरे भूति बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारा
यणि नमोस्तुते २२ सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोस्तुते २३ एतत्ते वदनं सौम्यं लोचनत्रयभू
षितं पातु नः सर्वभीतिभ्यः कात्यायनि नमोस्तुते २४ ज्वालाकरालमत्युग्रमशेषासुरसूदन त्रिशूलं पातु नो भीतेर्भद्रकालि नमोस्तुते २५ हिनस्ति दैत्य
तेजांसि स्वनेनापूर्य या जगत् सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव असुरासृग्वसापंकचर्चितस्ते करोज्वलः शुभाय खड्गो भवतु चं
डिके त्वां नता वयं २७ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान् सकलानभीष्टान् त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्र
यतां प्रयांति २८ एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणां रूपैरनेकैर्बहुधात्ममूर्त्तिं कृत्वांबिके तत्प्रकरोति कान्या २९ वि ८

शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च का त्वदन्या ममत्वगर्तेतिमहान्धकारे विभ्रामयत्येतदतीव विश्वं ३१ रक्षांसि यत्रोग्रविषाश्च नागा यत्रारयो
दस्युबलानि यत्र दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ३२ विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं विश्वेश
वंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्तिनम्राः ३३ देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः पापानि सर्वजगतां प्रश
मनयाशु उत्पातपाकजनितांश्च महोपसर्गान् ३४ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि त्रैलोक्यवासिनामीड्ये लोकानां वरदा भव ३५
देव्युवाच वरदाहं सुरगणा वरं यन्मनसेच्छथ तं वृणुध्वं प्रयच्छामि जगतामुपकारकं ३६ देवा ऊचुः सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्व
रि एवमेव त्वया कार्यमस्मद्वैरिविनाशनं ३७ देव्युवाच वैवस्वतेन्तरे प्राप्ते अष्टाविंशतिमे युगे शुंभो निशुंभश्चैवान्यावुत्पत्स्येते महासुरौ ३८
नंदगोपगृहे जाता यशोदागर्भसंभवा ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी ३९ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले अवतीर्य हनि
ष्यामि वैप्रचित्तांस्तु दानवान् ४० भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् रक्तदंता भविष्यंति दाडिमीकुसुमोपमाः ४१ ततो मां देवताः
स्वर्गे मर्त्यलोके च मानवाः स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां ४२ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि मुनिभिः संस्तुता भूमौ
संभविष्याम्ययोनिजा ४३ ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् कीर्तयिष्यंति मनुजाः शताक्षीमिति मां ततः ४४ ततोहमखिलं लो
कमात्मदेहसमुद्भवैः भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ४५ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि तत्रैव च वधिष्यामि दु
र्गमाख्यं महासुरं ४६ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले रक्षांसि भक्षयिष्यामि मुनीनां त्रा
णकारणात् तदा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ४७ भीमादेवीति विख्यातं तन्मे नाम भविष्यति यदारुणाख्यस्त्रैलोक्ये महा
बाधां करिष्यति ४८ तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ४९ भ्रामरीति च मां लो
कास्तदा स्तोष्यंति सर्वतः इत्थं यदा यदा बाधा दानवोत्था भविष्यति तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ५० इति श्रीमार्कं
डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये नारायणीस्तुतिर्नामैकादशोध्यायः ११ देव्युवाच एभिः स्तवैश्च मां नित्यं स्तोष्यते
यः समाहितः तस्याहं सकलां बाधां प्रशाप्यं १ मधुकैटभनाशं च महिषासुरघातनं कीर्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः २
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमं ३ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था

नयिष्याम्यहं

दु.
नचापदः भविष्यति नदारिद्र्यं नचैवेष्टवियोजनं ४ शत्रुतो नभयंतस्य दस्युतो वा नराजतः नशस्त्रानलतोयौघात्कदाचित्संभविष्यति तस्मान्ममैतन्माहात्म्यं
पठितव्यं समाहितैः श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ६ उपसर्गानशेषांस्तु महामारीसमुद्भवान् तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम
७ यत्रैतत्पठ्यते सम्यङ्नित्यमायतने मम सदा न तद्विमोक्ष्यामि सांनिध्यं तत्र मे स्थितं ८ बलिप्रदाने पूजायामग्निकार्ये महोत्सवे सर्वं ममैतच्चरितमु
च्चार्यं श्राव्यमेव च ९ जानताजानता वापि बलिपूजां तथा कृतां प्रतीच्छिष्याम्यहं प्रीत्या वह्निहोमं तथा कृतं १० शरत्काले महापूजा क्रिय
ते या च वार्षिके तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥ सर्वबाधाविनिर्मुक्तो धनधान्यसमन्वितः मनुष्यो मत्प्रसादेन भविष्यति
नसंशयः १२ श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः पराक्रमं च युद्धेषु जायते निर्भयः पुमान् १३ रिपवः संक्षयं यान्ति कल्या
णं चोपपद्यते नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां १४ शान्तिकर्मणि सर्वत्र तथा दुःस्वप्नदर्शने ग्रहपीडासु चोग्रासु माहात्म्यं शृ
णुयान्मम १५ उपसर्गाः शमं यान्ति ग्रहपीडाश्च दारुणाः दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते १६ बालग्रहाभिभूतानां बालानां शान्तिका
रकं संघातभेदे च नृणां मैत्रीकरणमुत्तमं १७ दुर्वृत्तानामशेषाणां बलहानिकरं परं रक्षोभूतपिशाचानां पठनादेव नाशनं १८ सर्वं
ममैतन्माहात्म्यं मम सन्निधिकारकं पशुपुष्पार्घ्यधूपैश्च गंधदीपैस्तथोत्तमैः १९ विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यै
श्च विविधैर्भोगैः प्रदानैर्वत्सरेण या २० प्रीतिर्मे क्रियते चास्मिन्सकृत्सुचरिते श्रुते श्रुतं हरति पापानि तथारोग्यं प्रयच्छति २१ रक्षां करोति भूते
भ्यो जन्मनां कीर्तनं मम युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणं २२ तस्मिंश्छ्रुते वैरिकृतं भयं पुंसां न जायते युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षि
भिः कृताः २३ ब्रह्मणा च कृतास्तास्तु प्रयच्छन्ति शुभां मतिं अरण्ये प्रान्तरे वापि दावाग्निपरिवारितः २४ दस्युभिर्वा वृतः शून्ये गृहीतो वापि शत्रु
भिः सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः २५ राज्ञा क्रुद्धेन चाज्ञप्तो वध्यो बन्धगतोपि वा आघूर्णितो वा वातेन स्थितः पोते महार्णवे
२६ पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे सर्वबाधासु घोरासु वेदनाभ्यर्दितोपि वा २७ स्मरन्ममैतच्चरितं नरो मुच्येत संकटात् म
म प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा २८ दूरादेव पलायन्ते स्मरतश्चरितं मम ऋषिरुवाच इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा प
श्यतामेव देवानां तत्रैवान्तरधीयत २९ तेपि देवा निरातंकाः स्वाधिकारान्यथापुरा यज्ञभागभुजः सर्वे चक्रुर्विनिहतारयः ३० दै
त्याश्च देव्या निहते शुंभे देवरिपौ युधि जगद्विध्वंसिनि तस्मिन्महोग्रेतुलविक्रमे ३१ निशुंभे च महावीर्ये शेषाः पातालमाययुः ॥ २१
एवं भगवती देवी सा नित्यापि पुनः पुनः संभूय कुरुते भूप जगतः परिपालनं तयैतन्मोहितं विश्वं सैव विश्वं प्रसूयते ३३

कै

सायाचिना च विज्ञानं तुष्टा ऋद्धिं प्रयच्छति व्याप्तं तयैतत्सकलं ब्रह्मांडं मनुजेश्वर ३४ महाकाल्या महाकाली महामारीस्वरूपया सैव काली महामारी
सैव सृष्टिर्भवत्यजा ३५ स्थितिं करोति भूतानां सैव काले सनातनी भवकाले नृणां सैव लक्ष्मीर्वृद्धिः प्रजायते ३६ सैवाभावे तथालक्ष्मीर्विनाशा
योपजायते स्तुता संपूजिता पुष्पैर्धूपगंधादिभिस्तथा ३७ ददाति वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ३८ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे
देवीमाहात्म्ये भगवतीवाक्यं नाम द्वादशोध्यायः १२ ऋषिरुवाच ॐ एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमं एवंप्रभावा सा देवी ययेदं धार्यते जगत् १
विद्या तथैव क्रियते भगवद्विष्णुमायया तया त्वमेव वैश्यश्च तथैवान्ये विवेकिनः २ मोह्यन्ते मोहिताश्चैव मोहमेष्यंति चापरे तामुपैहि महाराज ।
शरणं परमेश्वरीं ३ आराधिता सैव नृणां भोगस्वर्गापवर्गदा मार्कंडेय उवाच इति तस्य वचः श्रुत्वा सुरथः स नराधिपः ४ प्रणिपत्य महाभा
गं तमृषिं संशितव्रतम् निर्विण्णोतिममत्वेन राज्यापहरणेन च ५ जगाम सद्यस्तपसे स च वैश्यो महामुने संदर्शनार्थमंबाया नदी पुलिन
मास्थितः ६ स च वैश्यस्तपस्तेपे देवीसूक्तं परं जपन् तौ तस्मिन्पुलिने देव्याः कृत्वा मूर्तिं महीमयीं ७ अर्हणां चक्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः
निराहारौ यताहारौ तन्मनस्कौ समाहितौ ८ ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितम् एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः ९ परितुष्टा
जगद्धात्री प्रत्यक्षं प्राह चंडिका देव्युवाच यत्प्रार्थ्यते त्वया भूप त्वया च कुलनंदन मत्तस्तत्प्राप्यतां सर्वं परितुष्टा ददामि तत् १० मार्कंडेय उवाच
ततो वव्रे नृपो राज्यमविभ्रंश्यन्यजन्मनि अत्रैव च निजं राज्यं हतशत्रुबलं बलात् ११ सोपि वैश्यस्ततो ज्ञानं वव्रे निर्विण्णमानसः ममेत्यहमिति प्राज्ञः
संगविच्युतिकारकं १२ देव्युवाच स्वल्पैरहोभिर्नृपते स्वं राज्यं प्राप्स्यते भवान् हत्वा रिपूनस्खलितं तव तत्र भविष्यति १३ मृतश्च भूयः स
प्राप्य जन्म देवाद्विवस्वतः सावर्णिको मनुर्नाम भवान्भुवि भविष्यति १४ वैश्यवर्य त्वया यश्च वरोस्मत्तोभिवांछितः तं प्रयच्छामि संसिद्ध्यै
तव ज्ञानं भविष्यति १५ मार्कंडेय उवाच इति दत्वा तयोर्देवी यथाभिलषितं वरं बभूवांतर्हिता सद्यो भक्त्या ताभ्यामभिष्टुता १६ एवं दे
व्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः १७ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवी
माहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रयोदशोध्यायः १३ राजोवाच भगवन्नवताराणि चंडिकायास्त्वयोदिताः एतेषां प्रकृ
तिं ब्रह्म प्रधानं वक्तुमर्हसि । आराध्यं यन्मया देव्याः स्वरूपं येन वै द्विज विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे २ ऋषिरुवाच ॥

इदंरहस्यंपरमंमनाख्येयंप्रचक्ष्यते भक्तोसीतिनमेकिंचित्तववाच्यंनराधिप २ सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नं
व्यवस्थिता ४ मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती नागंलिंगंचयोनिंचबिभ्रतीनृपमूर्द्धि ५ तप्तकांचनवर्णाभातप्तकांचनभूषणा शून्यंतदखि
लंस्वेनपूरयामासतेजसा ६ शून्यंतदखिलंलोकेविलोक्यपरमेश्वरी बभाररूपमखिलंतमसाकेवलेनहि ७ साभिन्नांजनसंकाशादंष्ट्रा
ंचितवरानना विशाललोचनानारीबभूवतनुमध्यमा ८ खड्गपात्रशिरःखेटैरलंकृतचतुर्भुजा कबंधहारंशिरसाबिभ्राणाहिशिरःस्रजं ९ साप्रोवाचम
हालक्ष्मींतामसीप्रमदोत्तमा नामकर्मचमेमातर्देहितुभ्यंनमोनमः १० तांप्रोवाचमहालक्ष्मीस्तामसीदिव्यलोचनां ददामितवनामानियानि
कर्माणितानिते ११ महामायामहाकालीमहामारीक्षुधातृषा निद्रातृष्णाचैकवीराकालरात्रिर्दुरत्यया १२ इमानितवनामानिप्रतिपाद्यानिने
मया एभिःकर्माणितेज्ञात्वायोधीतेसोश्नुतेसुखं १३ तामित्युक्त्वामहालक्ष्मीःस्वरूपमपरंनृप सत्वाख्येनातिशुद्धेनगुणेनेंदुप्रभंदधौ १४ अक्ष
मालांकुशधरावीणापुस्तकधारिणी साबभूववरानारीनामान्यस्यैचसाददौ १५ महाविद्यामहावाणीभारतीवाक्सरस्वती आर्याब्राह्मीमह
धेनुर्वेदगर्भाचधीश्वरी १६ अथोवाचमहालक्ष्मीर्महाकालीसरस्वतीम् युवांजनयतांदेव्यौमिथुनेस्वानुरूपतः १७ इत्युक्त्वातेमहालक्ष्मी
ससर्जमिथुनंस्वयं हिरण्यगर्भौरुचिरौस्त्रीपुंसौकमलासनौ १८ ब्रह्मन्विधेविरिंचेतिधातरित्याहतंनरं श्रीःपद्मेकमलेलक्ष्मीत्या
श्री मातःस्त्रियंचतां १९ महाकालीभारतीचमिथुनेसृजतांसह एतयोरपिरूपाणिनामानिचवदामिते २० नीलकंठंरक्तबाहुंश्वेतांगंच श्री
हस्तोत्वरं जनयामासपुरुषंमहाकालीसितांस्त्रियं २१ सरुद्रःशंकरःस्थाणुःकपर्दीचत्रिलोचनः त्रयीविद्याकामधेनुःसास्त्रीभाषाक्षरास्वरा २२
विष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः उमागौरीसतीचंडीसुंदरीसुभगाशुभा २३ सरस्वतीस्त्रियंगौरींकृष्णंचपुरुषंनृप जनयामास
सनामानितयोरपिवदामिते २४ एवंयुवतयःसद्यःपुरुषत्वंप्रपेदिरे चक्षुष्मंतोनुपश्यंतिनेतरेतद्विदोजनाः २५ ब्रह्मणेप्रददौपत्नीं
महालक्ष्मीर्नृपत्रयीं रुद्रायगौरींवरदांवासुदेवायचश्रियं २६ स्वरयासहसंभूयविरिंचोण्डमजीजनत् बिभेदभगवान्रुद्रस्तद्गौर्या
सहवीर्यवान् २७ अंडमध्येप्रधानादिकार्यजातमभून्नृप महाभूतात्मकंसर्वंजगत्स्थावरजंगमं २८ पुपोषपालयामासतल्लक्ष्म्या
सहकेशवः महालक्ष्मीर्महाराजजगत्सर्वमयीश्वरी २९ निराकाराचसाकारासैवनानाभिधानभृत् नामांतरैर्निरूप्यैषानाम्ना
नान्येनकेनचित् ३० इतिश्रीमार्कंडेयःपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येप्राधानिकंनामरहस्यंप्रथमं १ ऋषिरुवाच त्रि